A-I/2/2255/ 21

द्वितीयसत्रार्द्धम्

द्वितीयपत्रम्

साहित्यम्

समयः घण्टात्रयम् **पूर्णाङ्काः 80**

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। **(15×2=30)**

1. ध्वनिः सामान्यतः कतिविधः?
2. 'स्निग्धश्यामल. . . . .' इत्यस्मिन् पद्ये ध्वनिप्रतिपादकः शब्दः कः?
3. 'तदा जायन्ते गुणा. . . . .' इत्यत्र व्यञ्जकशब्दः कः?
4. 'रविसङ्क्रान्त. . . . .' इति पद्यं कस्माद् ग्रन्थादुद्धृतम्?
5. विवक्षितान्यपरवाच्यस्य भेदद्वयं किम्?
6. असंलक्ष्यक्रमोद्योतः कः?
7. यत्र व्यङ्ग्यः वाच्यार्थापेक्षया क्रमेण प्रकाशते तत्र कः ध्वनिः?
8. 'रसभावतदाभासः. . . . .' कारिकां पूरयत।
9. 'रसादिपरता' इत्यत्र आदिशब्दस्य कोऽर्थः?
10. प्रसादगुणस्य लक्षणं किम्?
11. विवक्षितान्यपरवाच्यध्वनिः इत्यत्र अन्यपरमित्यस्य अभिप्रायं लिखत।

अथवा

स च रसादिलङ्कारः कतिविधः?

12. 'क्षिप्तो हस्तावलग्नः . . . . .' इत्यत्र वाक्यार्थः कः? अङ्गभूतरसश्च कः?

अथवा

रसादेरलङ्कारस्य विपक्षाः के?

13. यत्र अचेतनानां चेतनवस्तुवृत्तान्तयोजना भवति तत्र रसादिः कः?

अथवा

अङ्गाश्रिताः के?

14. अङ्गभूते शृङ्गारे अनुप्रासनिबन्धनं कथम्?

अथवा

एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः – कानि?

15. अर्थशक्त्युद्भवध्वनेः स्वरूपं किम्?

अथवा

"तत्पूर्णं ध्वनिलक्षणम्" कथम्?

ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः। **(5×6=30)**

16. वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।

रसादिपरता यत्र स ध्वनेर्विषयो मतः॥

–इति कारिकां व्याख्यात।

17. रसध्वनौ शब्दालङ्कारनिबन्धनं विमृशत।

अथवा

शब्दशक्त्युद्भवध्वनेः श्लेषस्य च भेदं दर्शयत।

18. अत्यन्ततिरस्कृतवाच्यध्वनेः लक्षणं सोदाहरणं प्रतिपादयत।

19. व्यतिरेकध्वनिं सोदाहरणं परामृशत।

अथवा

श्लेषध्वनिं सोदाहरणं परामृशत।

20. अलङ्कारध्वनेः प्रयोजकतां निर्दिशत।

अथवा

अविवक्षितवाच्यस्य ध्वन्याभासं व्याख्यात।

स. निबन्धात्मकः प्रश्नः समाधेयः। **(1×20=20)**

21. रसरसवदलङ्कारयोः पार्थक्यं विस्तरेण दर्शयत।

अथवा

गुणान् सप्रपञ्चं निरूपयत।

अथवा

अविवक्षित–विवक्षितान्यपरवाच्ययोः ध्वन्योः ध्वन्याभासं विवृणुत।